# संस्कृतवार्ता:

दिनाङ्क :- 17/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहल्यां न्यूजीलैण्ड्-देशस्य स्वसमकक्षेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापः साधित: ।
- अद्य नवदिल्ल्यां भारतस्य रक्षा-मन्त्रिणा श्रीराजनाथसिंहेन अमरीकायाः राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गबार्ड इत्यनया सहोपवेशनं विहितम् ।
- वक्फ - विधेयकविषये संसदः संयुक्तसमित्याः अध्यक्षेण जगदम्बिका-पालेन उक्तं यत् एतत् विधेयकं निर्धनमुस्लिमवर्गाणां पक्षे अस्ति।
- जम्मू-कश्मीरस्य कुपवाड़ा-मण्डले सुरक्षाबलानाम् आतङ्कवादिनां च मध्ये अद्य प्रातः संवृत्ते संघर्षे एकः अज्ञातातङ्कवादी मृतः।
- पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य कबड्डीविश्वचषकक्रीडा अद्य इङ्ग्लैण्ड्देशे समारब्धा।

-------------------------------------------

प्रधानमन्त्रि-नरेन्द्रमोदी

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदेहल्यां न्यूजीलैण्ड्-देशस्य स्वसमकक्षेण क्रिस्टोफर् लक्सन् इत्यनेन सह वार्तालापः साधित:। चर्चायामस्यां भारत-न्यूजीलैण्ड् देशयो: सम्बन्धस्य विभिन्नाः पक्षाः सम्मिलिताः आसन्। श्रीमोदी अतिथिविशेषस्य सम्मानार्थं मध्याह्नभोजनम् अपि आयोजितवान्। स्ववक्तव्ये, श्री मोदी अवदत् यत्, असौ द्विपाक्षिक-सम्बन्धस्य विभिन्नेषु विषयेषु विस्तृतचर्चां कृतवान्, अपि च उभौ पक्षौ रक्षा-सुरक्षयो: सहभागितां सुदृढं संस्थागतं च

कर्तुं निर्णयम् अकुरुताम् । श्रीमोदी उक्तवान् यत् संयुक्त-अभ्यासैः, प्रशिक्षणैः, नौकाश्रय-भ्रमणैश्च सह रक्षा-उद्योगक्षेत्रे अपि परस्परसहयोगाय अनेन मार्गः सज्जीभविष्यति ।

प्रधानमन्त्री अवदत् यत्, उभयोः देशयोः मध्ये परस्पर-लाभप्रदं मुक्तव्यापारसहभागितायां वार्तालापोपक्रमस्य निर्णयो सञ्जातः, येन परस्परव्यापारस्य निवेशस्य च सम्भावना वर्धयिष्यति।

आतंकवादस्य, पृथकतावादीनां, चरमपन्थी-तत्त्वानां विरुद्धं भारत-न्यूजीलैण्ड्-देशयोः सहकारः निरन्तरं भविष्यति इति प्रधानमन्त्री अवदत्। सः अवदत् यत्, उभौ पक्षौ स्वतन्त्रं, मुक्तं, सुरक्षितं, समृद्धं च इण्डो-पेसिफिक् इत्यस्य समर्थनं कुरुतः, विस्तारवादे न तु विकास-नीतौ विश्वसतः । स्वस्य वक्तव्ये श्री लक्सन इत्येषः अवदत् यत् उभौ पक्षौ परस्परं लाभप्रदं मुक्तव्यापारसमन्वयं साधयितुं उत्सुकाः सन्ति इति। सः अवदत् यत्, न्यूजीलैण्ड्-देशः भारते स्वस्य कूटनीतिक-उपस्थितिं वर्धयिष्यति इति। श्री लक्सन् अद्य सायङ्काले राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मन्त्रणां करिष्यति।

विदेशमन्त्रालयस्य पूर्वसचिवः जयदीप मजूमदारः अवदत् यत्, गतवर्षे भारत-न्यूजीलैण्ड्-देशयोः मध्ये अनेके उच्चस्तरीयाः सम्पर्काः अभवन् इति। खालिस्तानीय-तत्त्वानां विषये चर्चायाः समये प्रश्नस्य एकस्य विषये सचिवः अवदत् यत् द्वयोः नेत्रोः मध्ये वार्तालापस्य समये अयं विषयः उद्भूतः इति। सः अवदत् यत्, भारतं तेषु देशेषु भारत-विरोधी-तत्त्वानां गतिविधीनां विषये, आतङ्कवादस्य वैभवीकरणार्थं भाषणस्वातन्त्र्यस्य तथा च अन्यानां लोकतान्त्रिकस्वातन्त्र्यानां च दुरुपयोगस्य विषये सावधानतामाचरति। मजूमदारः अवदत् यत्, न्यूजीलैण्ड्-देशस्य सर्वकारः ग्रहणशीलः अस्ति, अतीते अपि चिन्ताः स्वीकृतवान् अस्ति। इतः पूर्वं श्री लक्सन इत्येषः राजघट्टं गत्वा महात्मागान्धी-वर्यस्य समाधौ श्रद्धाञ्जलिम् समर्पितवान्। न्यूज़ीलैण्ड्-देशस्य प्रधानमन्त्री भारतस्य पञ्चदिवसीयप्रवासावधौऽ ह्यः नवदेहली-नगरं आगतवान्। तेन सह मन्त्रिणः, वरिष्ठाः अधिकारिणः, व्यापारिणः, सञ्चारमाध्यमाः, भारतीय-प्रवासी-समुदायस्य सदस्याः च समेत्य उच्च-स्तरीय-प्रतिनिधिदलम् अस्ति। श्री लक्सन् वर्यस्य यात्रायाः उद्देश्यं उभयोः देशयोः मध्ये द्वैपाक्षिकसम्बन्धं सुदृढं कर्तुं, सर्वेषु क्षेत्रेषु सम्बन्धान् दृढतरं

कर्तुं, प्रत्येकै: जनैः सह सम्बन्धानां दृढीकरणम् इत्यस्ति। न्यूज़ीलैण्ड्-देशस्य प्रधानमन्त्री बुधवासरे मुम्बई-नगरं प्रति गमिष्यति।

---------------------------------------------

राजनाथ-तुलसीगबार्ड:

अद्य नवदिल्ल्यां भारतस्य रक्षा-मन्त्रिणा श्रीराजनाथसिंहेन अमेरिकायाः राष्ट्रीय-गुप्तचर-निदेशिकया तुलसी गबार्ड इत्यनया सहोपवेशनं विहितम् । उपवेशनावधौ उभौ नेतारौ सबलं अङ्गीकृतवन्तौ यत् सामरिक-सुरक्षा उभयोः देशयोः वैश्विक-सामरिक-सहयोगस्य प्रमुखः स्तम्भः वर्तते।

श्रीसिंहेन सुश्री-गबार्ड इत्यनया च भारत-अमेरिका-देशयोः सैन्याभ्यासस्य, सामरिक-सहयोगस्य, सूचना-संवहन-सहयोगस्य सहैव सामुद्रिकक्षेत्रेषु कृतायाः प्रमुखाप्रगतेः समीक्षा कृता। रक्षा-मन्त्रालयेन स्व-वक्तव्ये उक्तं यत् उभौ नेतारौ अत्याधुनिकरक्षा-नवाचारे विशिष्ट-प्रौद्योगिक्याञ्च सहयोगाय मार्गानन्वेष्टुं प्रयतितवन्तौ, अनेन पारस्परिक-सामरिक-हितस्य संवर्धनार्थं तयोः समर्पणं दृश्यते।

मन्त्रालयेन इदमप्युक्तं यत् उभाभ्यामपि नेतृभ्यां अन्तरसञ्चालनस्य, नवाचारस्य संवर्धनार्थं रक्षौद्योगिकानां आपूर्ति-शृङ्खलानां समेधनार्थञ्चापि सम्बोधनं कृतम्। अस्माकं संवाददाता अवोचत् यत् एताभिः चर्चाभिः भारत-अमेरिका-द्विपक्षीय-रक्षा-सहयोगस्य संवर्धमानायाः शक्तेः पुष्टीभवति।

---------------------------------------------

जगदम्बिकापाल-वक्फ:

वक्फ (संशोधन) विधेयकविषये संसदः संयुक्तसमित्याः अध्यक्षेण जगदम्बिका-पालेन उक्तं यत् एतत् विधेयकं निर्धनमुस्लिमवर्गाणां पक्षे अस्ति। वक्फसंशोधनविधेयकस्य विषये अखिलभारतीयमुस्लिमपर्सनल-लॉ-मण्डलस्य विरोधे श्रीपालः नवदिल्ल्यां वार्ताहरैः सह संवादक्रमे उक्तवान् यत् अल्पसंख्यकसमुदायेषु सर्वकारं विरुध्य मिथ्यापवादाः प्रसार्यन्ते । सः

अवदत् यत्, सर्वकारेण विधेयकं संयुक्तसंसदीयसमित्याः समीपे प्रेषितं येन मुस्लिमसङ्घटनैः अन्यैः हितधारकैश्च सह परामर्शं कृत्वा न्यायपूर्णं सन्तुलितं च विध्याः निर्माणं भवेत्।

---------------------------------------------

जम्मू-कश्मीर-संघर्षः

जम्मू-कश्मीरे उत्तरकश्मीरस्य कुपवाड़ा-मण्डले सुरक्षाबलानाम् आतङ्कवादिनां च मध्ये अद्य प्रातः संवृत्ते संघर्षे एकः अज्ञातातङ्कवादी मृतः। सेनाप्रवक्ता अवदत् यत् निगूढाः आतङ्कवादिनः सुरक्षाबलानाम् उपरि भुशुण्डिकाप्रहारं कृतवन्तः, येषां प्रतिकारे एकः आतङ्कवादी मृत्युमुपगतः। सङ्घर्षस्थलात् एकं एके-४७ भूशुण्डिका स्वायत्तीकृतास्ति ।

---------------------------------------------

प्रीज-नौसेनाप्रशिक्षकाः

राष्ट्रपतिपदासीनया द्रौपदी मुर्मुवर्यया उक्तं यत् यस्मिन् काले वैश्विकभूराजनीतिकोद्वेगः संवर्धते , तस्मिन् काले देशाः सामुद्रिक-सहयोगं, संयुक्ताभ्यासं च कुर्वन्ति। सा अवदत् यत् वैश्विकमञ्चे भारतस्य बृहत्तर- भूमिकया सह भारतीयनौसेनायाः समर्थने नौसेनासामग्रीप्रबन्धनसेवायाः नौसेनाशस्त्रसेवायाश्च अधिकारिणः महत्त्वपूर्णां भूमिकामाविष्कुर्वन्ति। राष्ट्रपतिनाद्य राष्ट्रपतिभवने भारतीयनौसेनासामग्रीप्रबन्धनसेवायाः भारतीयनौसेनाशस्त्रसेवायाश्च अधिकारीप्रशिक्षुभिः सह संवादं कुर्वन्त्या एतत् प्रख्यापितम् ।

---------------------------------------------

दिल्ली-बांग्लादेशी-निगडनम्

दिल्ल्यारक्षिदलेन विशेषाभियानान्तर्गतं सप्तबाङ्ग्लादेशी-प्रवासिनः निगृहीताः। पूर्वी-जनपदस्य जनपदारक्ष्यायुक्तेन अभिषेक-धानिया इत्यनेन विज्ञापितं यत् एते सर्वे भारत-बाङ्ग्लादेश-सीमायाः समीपवर्त्तिना नदीमार्गेण भारतं प्रविष्टाः सहैव निगडनभयात् दिल्ली-

एनसीआर-क्षेत्रस्य विविधेषु स्थलेषु निगूढतया निवसन्तः आसन्। डीसीपी-धानिया इत्येषः अवोचत् यत् एतेषां निर्वासन-प्रक्रिया समरब्धा वर्तते।

--------------------------------------------

<u>ट्रम्प-पीएम-पॉडकास्टर</u>

अमेरिकीराष्ट्रपतिना डोनाल्ड ट्रम्पेन अद्य अमेरिकी-पॉडकास्टर-इति साक्षात्कर्ता ए.आइ.-संशोधकेन लेक्स-फ्रिड्मैन्-इत्यनेन सह प्रधानमन्त्रिणः नरेन्द्र-मोदिनः पॉडकास्ट्-साक्षात्कारं स्वस्य Truth इति सामाजिक सन्जालीयपटले प्रसारितम्। साक्षात्कारे श्रीमोदिना राष्ट्रपतिट्रम्पेन सह स्वस्य सम्बन्धस्य विषये उक्तम्, तस्य सरलतायाः, अमेरिकादेशं प्रति समर्पणस्य च प्रशंसाम् अकरोत्। सः प्रथमकार्यकालस्य अपेक्षया अस्मिन् समये राष्ट्रपतिपदस्य कृते ट्रम्पः "इयोप्यधिकं सज्जः" इति बोधितवान् ।

--------------------------------------------

<u>कबड्डी-विश्वचषकक्रीडा</u>

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य कबड्डीविश्वचषकक्रीडा अद्य इङ्ग्लैण्ड्देशे समारब्धा। भारतीयपुरुषदलं इटलीदलं विरुध्य वोल्वर-हैम्पटन-नगरे स्वस्याभियानस्य आरम्भम् अकरोत्।

।। इति वार्ता:।।